# puShTimArgalakShaNAni

# पुष्टिमार्गलक्षणानि

## Document Information

Text title : puShTimArgalakShaNAni

File name : puShTimArgalakShaNAni.itx

Category : vishhnu, krishna, puShTimArgIya, haridAsa, vishnu

Location : doc_vishhnu

Author : haridAsa

Proofread by : PSA Easwaran psawaswaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

puShTimArgalakShaNAni

# पुष्टिमार्गलक्षणानि

सर्वसाधनराहित्यं फलाप्तौ यत्र साधनम् ।
फलं वा साधनं यत्र पुष्टिमार्गः स कथ्यते ॥ १॥

अनुग्रहेणैव सिद्धिर्लौकिकी यत्र वैदिकी ।
प्रयत्नादन्यथा विघ्नः पुष्टिमार्गः सः कथ्यते ॥ २॥

स्वरूपमात्रपरता तात्पर्यज्ञानपूर्वकम् ।
धर्मनिष्ठा यत्र चैव पुष्टिमार्गः स कथ्यते ॥ ३॥

यत्राङ्गीकरणेनैव योग्यतादिविचारणम् ।
अविलम्बः प्रभुकृतः पुष्टिमार्गः स कथ्यते ॥ ४॥

यत्र प्रभुकृतं नैव गुणदोषविचारणम् ।
अविलम्बः प्रभुकृतः पुष्टिमार्गः स कथ्यते ॥ ५॥

न लोकवेदसापेक्षं सर्वथा यत्र वर्तते ।
सापेक्षता स्वामिमुखे पूष्टिमार्गः स कथ्यते ॥ ६॥

वरणे दृश्यते यत्र हेतुर्नाणुरपि स्वतः ।
वरणं च निजेच्छातः पुष्टिमार्गः स कथ्यते ॥ ७॥

यत्र स्वतन्त्रता भक्तेराविर्भावानपेक्षणात् ।
सानुभावस्वरूपत्वं पुष्टिमार्गः स कथ्यते ॥ ८॥

लोकवेदभयाभावो यत्र भावातिरेकतः ।
सर्वबाधकतास्फूर्तिः पुष्टिमार्गः स कथ्यते ॥ ९॥

सम्बन्धः साधनं यत्र फलं सम्बन्ध एव हि ।
सोऽपि कृष्णेच्छया जातः पुष्टिमार्गः सकथ्यते ॥ १०॥

तत्सम्बधिषु तद्भावस्तद्भिन्नेषु विरोधिता ।
उदासीनेषु समता पुष्टिमार्गः स कथ्यते ॥ ११॥

विद्यमानस्य देहादेर्न स्वीयत्वेन भावनम् ।
परोक्षेऽपि तदर्थित्वं पुष्टिमार्गः स कथ्यते ॥ १२॥

भजने यत्र सेव्यस्य नोपकारकृतिः क्वचित् ।
पोषणं भावमात्रस्य पुष्टिमार्गः स कथ्यते ॥ १३॥

भजनस्यापवादो न क्रियते फलदानतः ।
प्रभुणा यत्र तद्भावात्पुष्टिमार्गः स कथ्यते ॥ १४॥

यत्र वा सुखसम्बधो वियोगे सङ्गमादपि ।
सर्वलीलानुभावेन पुष्टिमार्ग सः कथ्यते ॥ १५॥

फले च साधने चैव सर्वत्र विपरीतता ।
फलाभावः साधनस्य पुष्टिमार्गः स कथ्यते ॥ १६॥

पश्चात्तापः सदा यत्र तत्सम्बन्धिकृतावपि ।
वैन्योद्भावाय सततं पुष्टिमार्गः स कथ्यते ॥ १७॥

आविर्भावाय सापेक्षं दैन्यं यत्र हि साधनम् ।
फलं वियोगजं दैन्यं पुष्टिमार्गः स कथ्यते ॥ १८॥

विषयत्वेन तत्त्यागः स्वस्मिन् विषयातास्मृतेः ।
यत्र वै सर्वभावेन पुष्टिमार्गः स कथ्यते ॥ १९॥

एवंविधैर्विशेषेण प्रकारैस्तु सदाश्रितैः ।
हृदि धृत्वा निजाचार्यान्पुष्टिमार्गो हि बुध्यताम् ॥ २०॥

इति श्रीहरिदासनिरूपितपुष्टिमार्गलक्षणानि सम्पूर्णानि ।

Proofread by PSA Easwaran

*puShTimArgalakShaNAni*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*